| वर्णाः | उत्पत्तिस्थानानि |
|---|---|
| अ अः आ आः अ३ अः३ क ख ग घ ङ ह, जिह्वामूलीयम् (ᳵक, ᳵख) | कण्ठः (स्निग्धतालु) |
| इ इः ई ईः इ३ इः३ च छ ज झ ञ य श | तालु |
| ऋ ऋः ॠ ॠः ऋ३ ऋः३ ट ठ ड ढ ण र ष | मूर्धा |
| ऌ ऌ३ त थ द ध न ल स | दन्ताः |
| उ उः ऊ ऊः उ३ उः३ प फ ब भ म उपध्मानीयः (ᳶप, ᳶफ) | ओष्ठौ |
| ङ ञ ण न म | कण्ठादिस्थानैः सह नासिका अपि (स्थानद्वयम् अपेक्षितम्) |
| ए एः ए३ एः३ ऐ ऐः ऐ४ ऐः४ | कण्ठः तालु च (स्थानद्वयम् अपेक्षितम्) |
| ओ ओः ओ३ ओः३ औ औः औ४ औः४ | कण्ठः ओष्ठौ च (स्थानद्वयम् अपेक्षितम्) |
| व | दन्ताः ओष्ठः च (स्थानद्वयम् अपेक्षितम्) |
| अनुस्वारः | नासिका |

| आभ्यन्तरः यत्नः | वर्णाः | सम्बन्धः |
|---|---|---|
| स्पृष्टः | वर्गीयव्यञ्जनानि | एतेषु पवर्गीयानाम् उच्चारणे ओष्ठयोः स्पर्शः भवति। अन्येषाम् उच्चारणे स्थानानां जिह्वायाः च स्पर्शः भवति। स्पर्शः भवति इत्यतः स्पृष्टः यत्नः। |
| ईषत्स्पृष्टः | य,र,ल,व | एतेषाम् उच्चारणे अल्पः (ईषत्) स्पर्शः भवति। अतः एते ईषत्स्पृष्टाः। |
| विवृतः | स्वराः, श,ष,स,ह | एतेषाम् उच्चारणे स्थानानां जिह्वायाः च स्पर्शः न भवति। अतः एते विवृताः। |
| संवृतः | अ (ह्रस्वः) | |